"गजसहायाभ्याश्चेति वक्तव्यम्।" वार्त्ति इति तल्।) गजसमूहः। तत्पर्य्यायः। हास्तिकम् २। इत्यमरः। २। ८। ३६॥

गजदघ्नः, पुं, (गजेन परिमाणमस्य इति परिमाणार्थे दघ्नच्।) गजपरिमाणम्। इति मुग्धबोधम्॥

गजदन्तः, पुं, (गजस्य दन्तौ इव दन्तोऽस्य।) गणेशः। इति शब्दरत्नावली॥ (गजस्य दन्तः।) गजसम्बन्धिदन्तः। नागदन्तः। हातिर दाँत इति भाषा। स तु द्रव्यस्थापनार्थं भित्तिस्थदारुद्वयम्। दाण्डा इति भाषा॥

गजदन्तफला, स्त्री, (गजदन्ताकृति गजदन्त इव शुभ्रं वा फलमस्याः।) हस्तीरीलता। इति राजनिर्घण्टः॥

गजदानं, क्ली, (गजस्य दानं मदः गजकटादिभ्यः क्षरितो मद इत्यर्थः।) हस्तिमदः। इति राजनिर्घण्टः॥ (तस्य प्रस्रवणस्थानानि। यथा,—
"करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदच्युतिः।"
इति पालकाप्यम्॥
तथा च रघुः। ४। ४५।
"स सैन्यपरिभोगेण गजदानसुगन्धिना।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत्॥"
गजस्य हस्तिनो दानं प्रदानम्। गजसम्प्रदानम्। इति व्युत्पत्तिलभ्योऽर्थः॥)

गजद्वयसः, त्रि, (गजेन परिमाणमस्य इति। गज + "दघ्नमात्रद्वयसट् माने।" इति परिमाणार्थे द्वयसट्।) परिमितः। इति मुग्धबोधम्॥

गजपादपः, पुं, (गजस्य नाम्ना ख्यातः पादपः गजप्रियः पादपो वा।) स्थालीवृक्षः। इति भावप्रकाशः॥

गजपिप्पली, स्त्री, (गजोपपदेन युक्ता पिप्पली। गजनाम्ना ख्याता पिप्पली वा।) पिप्पलीभेदः। गजपिंपुल इति भाषा। तत्पर्य्यायः। करिपिप्पली २ इभकणा ३ कपिवल्ली ४ कपिल्लिका ५ श्रेयसी ६ वशिरः ७ गजाह्वा ८। इति रत्नमाला॥ कोलवल्ली ९। इत्यमरः॥ वसिरः १०। इति तट्टीका॥ गजोषणा ११ चव्यफलम् १२ चव्यजा १३ छिद्रवैदेही १४ दीर्घग्रन्थिः १५ तैजसी १६ वर्त्तुली १७ स्थूलवैदेही १८। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रक्षामलविशोषणत्वम्। बलासवातहरत्वम्। स्तनकर्णविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ भेदाग्निकारित्वम्। इति राजवल्लभः॥ तत्पर्य्यायगुणाः। यथा, भावप्रकाशः।
"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली।
कपिवल्ली कोलवल्ली श्रेयसी वशिरश्च सा॥
गजकृष्णा कटुवातश्लेष्मनुद्वह्निवर्द्धिनी।
उष्णा निहन्त्यतीसारश्वासकण्ठामयक्रिमीन्॥"

गजपुटः, पुं, (गजाह्वयः पुटः हस्तप्रमाणो गर्त्तः।) औषधपाकार्थं हस्तपरिमितगर्त्तः। इति वैद्यकम्॥ अस्य प्रमाणं गजशब्दे द्रष्टव्यम्॥ (लौहमारणादावस्य प्रयोजनं यथा,—
"दशादिशतपर्य्यन्तो गजपुटविधिर्म्मतः॥"
इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे जारणविध्यधिकारे॥ क्वचित् क्लीवलिङ्गत्वमपि दृश्यते। यथा, भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।
"सपादहस्तमानेन कुण्डे निम्ने यथायते।
वनोपलसहस्रेण पूर्णे मध्ये विधारयेत्॥
पुटनद्रव्यसंयुक्तां कोष्ठिकां मुद्रितां मुखे।
अथार्द्धानि करण्डानि अर्द्धान्युपरि निःक्षिपेत्॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्व्वपुटोत्तमम्॥
हस्तश्चतुर्व्विंशत्यङ्गलप्रमाणः सपादस्तेन त्रिंशदङ्गलप्रमाणेनेत्यर्थः। अतएवोक्तम्।
साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः॥"
इति गजपुटम्॥)

गजप्रिया, स्त्री, (गजस्य प्रिया।) शल्लकीवृक्षः। इति हेमचन्द्रः॥

गजबन्धनी, स्त्री, (गजः हस्ती बध्यते लौहशृङ्खलादिभिः रुध्यतेऽस्याम्। बन्ध + ल्युट् ङीप् च।) गजबन्धनस्थानम्। हातिशाला इति भाषा। तत्पर्य्यायः। वारी २। इत्यमरः। २।८। ४३॥ वारिः ३। इति भरतः॥ शारब्धिः ४। इति जटाधरशब्दरत्नावल्यौ॥

गजभक्षकः, पुं, (गजेन हस्तिना भक्ष्यते इति। भक्ष + कर्म्मणि अप् ततः कप् स्वार्थे कन् वा। यद्वा गजः हस्ती भक्षकोऽस्य।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

गजभक्षा, स्त्री, (गजेन भक्ष्यतेऽसौ। भक्ष् + अप् + टाप्।) शल्लकीवृक्षः। इति शब्दरत्नावली॥

गजभक्ष्या, स्त्री, (गजेन भक्ष्या भक्षणीया।) शल्लकीवृक्षः। इत्यमरः। २। ४। १२३॥

गजमाचलः, पुं, स्त्री, (मच् + भावे घञ् माचः। गजस्य हस्तिनः माचं दम्भं लाति आदत्ते लुनाति वा बाहुलकात् डः।) सिंहः। इति हारावली॥

गजमात्रः, त्रि, (गजेन परिमाणमस्य इति। "दघ्नमात्रद्वयसट् माने।" इति परिमाणार्थे मात्र।) गजपरिमितः। इति मुग्धबोधम्॥

गजमोटनः, पुं, स्त्री, (गजं हस्तिनं मोटयति मर्द्दयतीति। मुट् मर्द्दने + कर्त्तरि ल्युः।) सिंहः। इति शब्दमाला॥

गजवदनः, पुं, (गजस्य वदनमेव वदनं यस्य।) गणेशः। इति हलायुधः॥

गजवल्लभा, स्त्री, (गजस्य वल्लभा प्रिया।) गिरिकदली। शल्लकी। इति राजनिर्घण्टः॥

गजसाह्वयं, क्ली, (गजनाम्ना नरपतिना सह आह्वयो नाम यस्य।) हस्तिनापुरम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ३।१।८।
"ततो द्यूतजिताः पार्थाः कोपिताश्च दुरात्मभिः।
धार्त्तराष्ट्रैः सहामात्यैर्निर्ययुर्गजसाह्वयात्॥")

गजाख्यः, पुं, (गजाख्यया आख्यातः गजेन सह आख्या यस्येति वा गजकर्णवदस्य पत्राकारत्वात्तथात्वमिति केचित्।) चक्रमर्द्दवृक्षः। इति राजनिर्घण्टः॥

गजाग्रणीः, पुं, (अग्रे नीयते इति अग्रणीः। गजानां अग्रणीः श्रेष्ठः।) ऐरावतहस्ती। इति शब्दरत्नावली॥

गजाजीवः, पुं, (आजीव्यतेऽस्मादनेन वा आजीवः आ + जीव् + कर्म्मण्यप्। गजः आजीवः जीवनोपायोऽस्य। गजपरिचालनपालनादिकार्य्यमालम्ब्य आजीवतीति। जीव् + कर्त्तरि अच् वा।) हस्तिपालकः। तत्पर्य्यायः। आधोरणः २ हस्तिपकः ३ इभपालकः ४। इति हेमचन्द्रः॥

गजाण्डं, क्ली, (गजस्याण्डवत् मूलमस्य।) पिण्डमूलम्। इति राजनिर्घण्टः॥

गजाननः, पुं, (गजस्य हस्तिन आननं मुखमेव आननं यस्य।) गणेशः। इत्यमरः।१।१।४१॥ (यथा, ब्रह्मवैवर्त्ते गणेशखण्डे ६ अध्याये।
"शनिदृष्ट्या शिरश्छेदात् गजवक्त्रेण योजितः।
गजाननः शिशुस्तेन नियतिः केन बाध्यते॥"
पुराणान्तरे मतभेदोऽपि दृश्यते यथा, स्कान्दे गणेशखण्डे ११ अध्याये।
गुरुरुवाच।
"अवतारो यदि कृतः साधुत्राणाय भो विभो!
प्रकाशयाशु वदनं सर्व्वेषां शोकनाशनम्॥
नयस्व सर्व्वदेवानामानन्दं हृदये प्रभो!।
शिव उवाच।
प्रत्युवाच गुरुं पुत्त्रः पार्व्वत्या हीनमस्तकः॥
शिशुरुवाच।
महेशाख्येन राज्ञा ते प्रणतौ चरणौ यदा।
तदाशीर्या त्वया दत्ता तस्मै राज्ञे गुरो मुदा॥
गजयोनौ जनिर्मुक्तिः शिवहस्ताद्दुदीरिता।
तत् सर्व्वमभवत् तस्य विद्यते चारुमस्तकः॥
पूज्यमानः शिवेनास्ते मुण्डादण्डः सुशोभनः।
अवतारकरोऽसौ मे गुरोऽस्ति भविता मुखम्॥
शिव उवाच।
आश्चर्य्यपूर्णहृदयो गुरुरूचे पुनः शिशुम्॥
गुरुरुवाच।
भगवन्! विश्वरूपोऽसि त्रिकालज्ञोऽखिलेश्वरः।
मया यदुदितं तस्मै त्वया ज्ञातं यतः प्रभो!॥
अहमीशस्वरूपं ते परिच्छेत्तुं न च क्षमः।
श्रुत्वैव ब्रह्मणः पुत्त्रो नारदस्तत्र चाब्रवीत्॥
नारद उवाच।
एवमेवावतीर्णोऽसि हीनमूर्द्धा कथं प्रभो!।
अथवा बालरूपस्य छिन्नं ते केन तच्छिरः॥
एतन्मे संशयं छिन्धि कृपया परमेश्वर!।
शिव उवाच।
निपीय नारदीं वाणीमुवाच शिशुरूपकः॥
शिशुरुवाच।
सिन्दूरः कोऽपि दैत्यो मे वायुरूपधरोऽच्छिनत्।
अष्टमे मासि सम्पूर्णे प्रविश्योमोदरं शिरः।
तमिदानीं हनिष्येऽहं गजास्यं वाप्स्यते हि च!।
शिव उवाच।
श्रुत्वैव नारदः प्राह शिशुरूपिणमीश्वरम्॥
नारद उवाच।
अकिञ्चिज्ज्ञा वयं देव! योजनेऽस्य मुखस्य ते
त्वमेव च स्वभावेन मस्तमेतन्नियोजय।